श्लाघः प्रशंसा । ङ कथ्यते गुणिनं गुणी । इति दुर्गादासः ॥

कथ, त् क शैथिल्ये । इति कविकल्पद्रुमः ॥ (चुरां-परं-अकं-सेट् ।) कथयति कथापयति । इति दुर्गादासः ॥

कत्सवरं, क्ली, (कद् वैकल्ये + स । कत्सः विह्वलता तया म्रियते शिर एवान्तःकरणस्थानं स्कन्धस्य शिरोऽन्तवर्त्तित्वात् तथात्वम् । कत्स + वृ + अप् ।) स्कन्धः । इति शब्दचन्द्रिका ॥

कथ, त् क वाक्यप्रबन्धे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) कथयति । इति दुर्गादासः ॥ ("हन्त ! ते कथयिष्यामि सेतिहासं पुरातनम्" । इति भागवतम् ॥)

कथं अ, कथम् । किंप्रकारम् । इति व्याकरणम् ॥ (यथा, मनुः ५ । २ ।
"कथं मृत्युः प्रभवति वेदशास्त्रविदां प्रभो" ! ॥)

कथकः, त्रि, (कथयति यः । कथ + कर्त्तरि ण्वुल् ।) वक्ता । कथोपजीवी । नाटकवर्णनकर्त्ता । तत्पर्य्यायः । एकनटः २ कथाप्राणः ३ । इति शब्दरत्नावली ॥ (यथा महाभारते १ । २१५ । ३ ।
"कथकाश्चापरे राजन् श्रमणाश्च वनौकसः" ॥
ग्रन्थकर्त्तृविशेषः । (यथा, अनुमानचिन्तामणिः ।
"वायुक्तसाध्यनियमच्युतोऽपि कथकैरुपाधिबद्धाव्यः" ॥)

कथङ्कथिकः, त्रि, (कथं कथमिति प्रवृत्तेनास्त्यस्य इति । कथंकथं + बाहुलकात् ठन् ततष्टिलोपः ।) प्रष्टा । प्रश्नकर्त्ता । इति त्रिकाण्डशेषभूरिप्रयोगौ ॥

कथङ्कथिकता, स्त्री, (कथङ्कथिक + भावे तल् ।) पृच्छा । प्रश्नः । इति हेमचन्द्रः ॥

कथनं, क्ली, (कथ्यते इति । कथला वाक्यप्रबन्धे । भावे + ल्युट् ।) कथा । इति हलायुधः ॥ कहन इति भाषा । (यथा पञ्चतन्त्रे १ । १३ ।
"मिथ्याक्रमकथनं कूटतुलामानम्" ॥)

कथम्, अ, (कस्मिन् प्रकारे इति प्रकारार्थे + "किमश्चेति" ।५।३।२५। थमुः कादेशश्च ।) हर्षः । गर्हा । प्रकारार्थः । सम्भ्रमः । प्रश्नः । सम्भावना । इति मेदिनी ॥ (यथा शाकुन्तले १ अङ्के
"कथमिदानीमात्मानं निवेदयामि
कथं वा आत्मापहारं करोमि" ॥)

कथा, स्त्री, (कथ + "चिन्तिपूजिकथिकुम्बिचर्चिश्चेति" । ३ । ३ । १०५ । अङ् । टाप् च ।) प्रबन्धकल्पना । इत्यमरः । १ । ६ । ६ । प्रबन्धेन कल्पना अथवा प्रबन्धस्य अभिधेयस्य कल्पना स्वयं रचना इति सारसुन्दरी ॥ "प्रबन्धस्य कल्पना रचना बहन्तास्तोकसत्या" । इति भरतः ॥
"प्रबन्धकल्पनां स्तोकसत्यां प्राज्ञाः कथां विदुः । परम्पराश्रया या स्यात् सा मताख्यायिका क्वचित्" ॥ इति कोलाहलाचार्य्यः ॥ ("नैयायिकमते हि नानावक्तृकपूर्व्वपक्षसिद्धान्तवान् वाक्यसन्दर्भः" । यथा, मनुः । ३ । २३१ ।
"यद्यद्रोचेत विप्रेभ्यस्तत्तद्दद्यादमत्सरः । ब्रह्मोद्याश्च कथाः कुर्य्यात्पितृणामेतदीप्सितम्" ॥ वार्त्ता । वाक्यम् । यथा, रघुः । ८ । ४३ ।
"अभितप्तमयोऽपि मार्द्दवं
भजते कैव कथा शरीरिषु" ॥
विवरणम् । यथा, रामायणे । १ । ८ । ६ ।
"सनत्कुमारो भगवान् पुरा कथितवान् कथाम् । भविष्यं विदुषां मध्ये तव पुत्त्रसमुद्भवम्" ॥)

कथाप्रसङ्गः, त्रि, (कथायां प्रसङ्गो यस्य ।) जल्पाकः । इति शब्दरत्नावली ("तेन सह नानाकथाप्रसङ्गेनावस्थितः" ॥ इति हितोपदेशः ॥) वातूलः । विषवैद्यः । इति मेदिनी । (किरातार्ज्जुनीये । १ । २४ । "कथाप्रसङ्गेन जनैरुदाहृतादनुस्मृताखण्डलसूनुविक्रमः" ॥ वार्त्ता । गोष्ठीवचनम् । उक्तञ्च कथासरित्सागरे २२ । १८१ ।
"मिथः कथाप्रसङ्गेन विवादं किल चक्रतुः" ॥)

कथाप्राणः, त्रि, (कथया प्राणिति जीवति कथां श्रावयित्वैव जीवनोपायं करोतीत्यर्थः । प्र + अन् + अच् । यद्वा कथायां प्राणाः जीवनोपायाः यस्य ।) कथकः । स तु नाटकवक्ता । इति शब्दरत्नावली ॥

कथितः, त्रि, (कथ्यते स्मौ । कथ + कर्म्मणि + क्तः ।) उक्तः । (यथा, श्रीभागवतम् । १० । १ । १ ।
"कथितो वंशविस्तारो भवता सोमसूर्य्ययोः" ॥
कथ + भावे क्तः । कथनम् । यथा रघुः । ११ । १० ।
"पूर्व्ववृत्तकथितैः पुराविदः
सानुजः पितृसखस्य राघवः" ॥)

कद, इ रोदने । आह्वाने । वैक्लव्ये । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं अकं च-सेट्-इदित् ।) इ कर्म्मणि कन्द्यते । इति दुर्गादासः ॥

कद, घ म ङ वैक्लव्ये । विह्वलीभावे । इति कविकल्पद्रुमः । (भ्वादिं-आत्मं-अकं-सेट्-घटादि ।) घ कदा । म कदयति । ङ कदते । इति दुर्गादासः ॥

कदः, पुं, (कं जलं ददाति । क + दा + क ।) मेघः । इति शब्दरत्नावली ॥

कदकः, पुं, (कदः मेघ इव कायति प्रकाशते उपरिभागे । कद + कै + क ।) वितानम् । इति हेमचन्द्रः ॥ चाँदोया इति भाषा ॥

कदक्षरं, क्ली, (कुत्सितं अक्षरं । कोः कदादेशः ।) कुत्सितवर्णः ॥

कदध्वा, [न्] पुं, (कुत्सितोऽध्वा । कुगतीति समासः । कोः कत् तत्पुरुषेचेति कदादेशः ।) निन्दितपथः । तत्पर्य्यायः । व्यध्वः २ दुरध्वः ३ विपथः ४ कापथः ५ । इत्यमरः २ । १ । १६ ॥

कदनं, क्ली, (कदयति दुःखं वैक्लव्यं वा प्राप्नोत्यनेन कद्यते दुःखं प्राप्यतेऽनेन वा । कद + णिच् + करणे ल्युट् । घटादित्वात् न वृद्धिः । कद्यते इति भावे ल्युट् । कद्यते आहन्यते विह्वलीक्रियते निहन्यते वा यत्र । अधिकरणे णिच् ल्युट् यद्वा कद्यते म्रियते यत्र ।) पापम् । (यथा, भागवते ७।९।१६ ।
"त्रस्तोऽस्म्यहं कृपणवत्सल ! दुःसहोग्रसंसारचक्रकदनात् ग्रसतां प्रणीतः" ॥)
मर्द्दः । (यथा, रामायणे । ६ । २८ । २० ।
"क्रोधेन कदनं चक्रे वानराणां युयुत्सताम्" ॥)
युद्धम् । इति मेदिनी ॥ (यथा, भागवते ।७।२।१३।
"इति ते भर्त्तृनिर्द्देशमादाय शिरसादृताः । तथा प्रजानां कदनं विदधुः कदनप्रियाः" ॥)
मारणम् । इति भूरिप्रयोगः जटाधरश्च ॥

कदन्नं क्ली, (कुत्सितं अन्नं । कोः कदादेशश्च ।) कुत्सितान्नम् । इति व्याकरणम् ॥
(यथा, भागवते ।५।९।८। "मिष्टं कदन्नं वा अभ्यवहरति परं नेन्द्रियप्रीतिनिमित्तम्" ॥
"हविर्विना हरिर्याति विना पीठेन माधवः । कदन्नैः पुण्डरीकाक्षः प्रहारेण धनञ्जयः" ॥ इत्युद्भटः ॥)

कदम्बं, क्ली, ("कडकदिकडिकटिभ्योऽम्बच्" । उणां । ४ । ८२ । इति कद् + अम्बच् ।) निकुरम्बम् । समूहः । इति मेदिनी ॥

कदम्बः, पुं, (कद्यते दर्शनात् विरहिणां चित्तवैक्लव्यं जायतेऽनेन । कद् + करणे अम्बच् ।) वृक्षविशेषः । कदम् इति भाषा । तत्पर्य्यायः । नीपः २ प्रियकः ३ हलिप्रियः ४ । इत्यमरः ।२।४।४२ ॥ कादम्बः ५ । इति तट्टीका ॥ षट्पदेष्टः ६ प्रावृषेण्यः ७ हरिप्रियः ८ । इति रत्नमाला ॥ वृत्तपुष्पः ९ सुरभिः १० ललनाप्रियः ११ कादम्बर्य्यः १२ सीधुपुष्पः १३ महाढ्यः १४ कर्णपूरकः १५ । अस्य गुणाः । तिक्तत्वम् । कटुत्वम् । कषायत्वम् । वातपित्तकफार्त्तिनाशित्वम् । शीतलत्वम् । शुक्रबर्द्धनत्वञ्च । इति राजनिर्घण्टः ॥ (यथा भावप्रकाशे ।
"कदम्बो मधुरः शीतो कषायो लवणो गुरुः । सरो विष्टम्भकृद्रूक्षः कफस्तन्यानिलप्रदः" ॥
तथा च सुश्रुतः ।
"गरदोषहरं नीपं प्राचीनामलकं तथा" ॥)
अथ नीपहलिप्रियौ धाराकदम्बवाचिनावपि कदम्बसाम्यात् पठितौ । यथा साहः ॥
"नीपो महाकदम्बः स्याद्धाराकदम्ब इत्यपि । द्वितीयोऽल्पप्रसरश्च वृत्तपुष्पः कदम्बकः" ॥
इत्यस्य भेदः । तथा रत्नेऽपि । हारिद्रस्तु रजो बलः । यथामरटीकायां भरतः ॥
"धूलीकदम्बका धारा कदम्बः षट्पदप्रियः ॥ वृत्तपुष्पः केशराढ्यः प्रावृषेण्यः कदम्बकः । नीपो महाकदम्बोऽपि तथा बहुफलो मतः" ॥
(यथा, — साहित्यदर्पणम् । "यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपास्ते चोन्मीलितमालतीसुरभयः प्रौढ़ाः कदम्बानिलाः" ॥ कविभिस्तु प्रायशो वर्षाकाले एव अस्य वर्णनं क्रियते । माघे रैवतकपर्व्वतवर्णने द्रष्टव्यम् ॥*॥) सर्षपः । इति मेदिनी ॥ देवताड़वृक्षम् । इति रत्नमाला ॥
(कं प्रजापत्यधिष्ठातृकं शेफेन्द्रियं दमयति इति व्युत्पत्त्या जितेन्द्रियतत्त्वज्ञानी । कदं कदनं विनाशं याति गच्छति प्रलये इति शेषः । इति व्युत्पत्त्या जगत् । यथा,—
"स एव सौम्य नित्यं राजते मूले विश्व कदम्बस्य परमो वै पुरुष आत्मा" ॥ इति श्रुतौ ॥)

कदम्बकं, क्ली, (कदम्ब + संज्ञायां कन् ।) समूहः । इत्यमरः । २ । ५ । ४० ॥ (यथा, शाकुन्तले २ अङ्के । "गाहन्तां महिषा निपानसलिलं शृङ्गै-